# 3. सुभाषितानि-1



वयम् पठामः



वयम् क्रीडामः

पठामः विविधान् पाठान् सानन्दं ध्यानपूर्वकम्।
ततः क्रीडाङ्गणं गत्वा खेलामः बन्धवो वयम्।।

संख्याक्रमानुसारेण अन्वयस्य पूर्तिः अधः प्रदत्ते स्थाने करणीया।

(7) पठामः (3) विविधान् (4) पाठान् (5) सानन्दं (6) ध्यानपूर्वकं (8) ततः (9) क्रीडाङ्गणं (10) गत्वा (11) खेलामः (2) बन्धवः (1) वयं

**अन्वयः**

..........................................................................................

..........................................................................................

..........................................................................................

# अनुशीलनम्

## 1. 'आम्' अथवा 'न' इति वदत।

*उत्तराणि*

(i) किं वयं विविधान् पाठान् पठामः? --------

(ii) किं वयं विविधान् पाठान् सानन्दं ध्यानपूर्वकं च पठामः? --------

(iii) किं वयं पठनात् परं क्रीडाङ्गणं गत्वा खेलामः? --------

(iv) किं वयं सर्वे बन्धवः? --------

## 2. एकेन वाक्येन उत्तरं देहि।

(i) यूयं विद्यालये किं किं पठथ? ----------------

(ii) यूयं विद्यालये कथं पठथ? ----------------

(iii) यूयं कदा खेलथ? ----------------

(iv) यूयं कुत्र खेलथ? ----------------

(v) किं यूयं सर्वे बन्धवः? ----------------



अभिवादनशीलस्य नित्यं वृद्धोपसेविनः ।
चत्वारि तस्य वर्धन्ते आयुर्विद्या यशो बलम्।।2।।

संख्याक्रमानुसारेण अन्वयस्य पूर्तिः अधःप्रदत्ते स्थाने करणीया।

(2) नित्यं (5) आयुः, विद्या, यशः, बलम् (इति एतानि) (1) अभिवादनशीलस्य (4) तस्य (3) वृद्धोपसेविनः (7) वर्धन्ते (6) चत्वारि

**अन्वयः**

.....................................................................................

.....................................................................................

.....................................................................................

# अनुशीलनम्

**1. आम् अथवा न इति लिखत।**

| | उत्तराणि |
|---|---|
| (i) किम् अभिवादनशीलस्य आयुः वर्धते? | -------- |
| (ii) किं नित्यं वृद्धोपसेविनः यशः वर्धते? | -------- |
| (iii) किम् अभिवादनशीलस्य विद्या क्षीयते? | -------- |
| (iv) किं वृद्धोपसेविनः बलं क्षीयते? | -------- |

**2. अधोलिखित-प्रश्नानाम् उत्तराणि एकेन-पदेन लिखत।**

| | |
|---|---|
| (i) अभिवादनशीलस्य किं किं वर्धते? | -------- |
| (ii) कस्य चत्वारि वर्धन्ते? | -------- |



भाषासु मुख्या मधुरा दिव्या गीर्वाणभारती।
तत्रापि मधुरं काव्यं तस्मादपि सुभाषितम्।।3।।

संख्याक्रमानुसारेण अन्वयस्य पूर्तिः अधःप्रदत्ते स्थाने करणीया

(1) भाषासु (5) दिव्या (च) (3) मुख्या (2) गीर्वाणभारती (4) मधुरा (10) सुभाषितं (मधुरतरम्) (7) काव्यं (9) तस्मादपि (6) तत्रापि (8) मधुरं

**अन्वयः**

..........................................................................................

..........................................................................................

..........................................................................................

# अनुशीलनम्

1. **आम् अथवा न इति लिखत।**

| | | उत्तराणि |
|---|---|---|
| (i) | किं भाषासु गीर्वाणभारती मुख्या? | -------- |
| (ii) | किं काव्यात् सुभाषितं मधुरतरम्? | -------- |
| (iii) | किं भाषासु काव्यम् मधुरम्? | -------- |
| (iv) | किं भाषासु गीर्वाणभारती दिव्या? | -------- |
| (v) | भाषाणां मध्ये का भाषा मुख्या, मधुरा दिव्या च? | -------- |



छायामन्यस्य कुर्वन्ति तिष्ठन्ति स्वयमातपे।
फलान्यपि परार्थाय वृक्षाः सत्पुरुषा इव।।4।।

संख्याक्रमानुसारेण अन्वयस्य पूर्तिः अधः प्रदत्ते स्थाने करणीया

(4) कुर्वन्ति (1) वृक्षाः (2) सत्पुरुषाः इव (3) अन्यस्य छायां (5) स्वयम् (6) आतपे (9) परार्थाय (7) तिष्ठन्ति (8) फलानि अपि (10) यच्छन्ति

**अन्वयः**

.............................................................................................

.............................................................................................

.............................................................................................

# अनुशीलनम्

**1. आम् अथवा न इति लिखत।**

*उत्तराणि*

(i) किं वृक्षाः स्वस्य अर्थे छायां कुर्वन्ति? --------

(ii) किं वृक्षाः सत्पुरुषा इव सन्ति? --------

(iii) किं तरवः आतपे तिष्ठन्ति? --------

(iv) किं पादपाः फलानि स्वयमेव खादन्ति? --------

(v) किं वृक्षाः सत्पुरुषा इव परोपकारिणः? --------

**2. अधोलिखित-प्रश्नानाम् उत्तराणि एकेन पदेन लिखत।**

(i) वृक्षाः छायां कस्मै यच्छन्ति? --------

(ii) पादपाः स्वयं कुत्र तिष्ठन्ति? --------

(iii) के सत्पुरुषा इव भवन्ति? --------

**3. समानार्थकपदैः सह मेलयत।**

| | | *उत्तराणि* |
|---|---|---|
| दिनकरः | सत्पुरुषः | ................ |
| तरुः | सूर्यः | ................ |
| सज्जनः | वृक्षः | ................ |

## 4. रेखाङ्कितपदम् अधिकृत्य प्रश्ननिर्माणं कुरुत।

*उत्तराणि*

(i) वृक्षाः **छायाम्** अन्यस्य कुर्वन्ति। ..................

(ii) वृक्षाः स्वयम् **आतपे** तिष्ठन्ति। ..................

(iii) **वृक्षाः** सत्पुरुषा इव। ..................

(iv) वृक्षाः **फलानि** परार्थाय यच्छन्ति। ..................